# 2019-20

## आदर्श प्रश्न पत्रम् -1

## विषय – संस्कृतम्

## कक्षा – दशमी

**समय – होरात्रयम्** **पूर्णाङ्काः – 80**

## सामान्यनिर्देशाः-

- कृपया सम्यग्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 08 पृष्ठानि मुद्रितानि सन्ति ।
- कृपया सम्यग्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांङ्कः अवश्यं लेखनीयः ।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति । अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम् ।

**प्रश्नपत्रस्वरूपम् –**

| | | | |
|---|---|---|---|
| **खण्ड : क** | : | **अपठित-अवबोधनम्** | **10 अङ्काः** |
| **खण्ड : ख** | : | **रचनात्मकं -कार्यम्** | **15 अङ्काः** |
| **खण्ड : ग** | : | **अनुप्रयुक्त -व्याकरणम्** | **25 अङ्काः** |
| **खण्ड : घ** | : | **पठित-अवबोधनम्** | **30 अङ्काः** |

- ❖ अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
- ❖ प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
- ❖ प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेन लेखनीया ।
- ❖ सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
- ❖ प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

## खण्डः (क)

## अपठित-अवबोधनम्

**प्रश्न-1→ अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत—**

संस्कृति: नाम संस्कारेण संस्करणं परिष्करणं च भवति। यया संस्कृत्या सभ्यतया च भारतीया : जना: संस्कारं परिष्कारं च लभन्ते । सा एव भारतीया : संस्कृति:। इयम् 'आर्यसंस्कृति:' अपि कथ्यते। एषा संस्कृति: जनानां हृदयेभ्य: दुर्गुणान्, दुर्व्यसनानि, पापानि च निस्सार्य दूरीकरोति। सदाचार- शिक्षणेन च सा मानव-मनांसि निर्मलानि सात्त्विकानि च करोति। 'बन्धुत्त्व-भावना' अस्माकं भारतीयानां संस्कृते: प्रमुखा विशेषता वर्तते। संस्कृति इयं विश्वस्य सर्वेभ्य: मानवेभ्य: सौख्यम् उपदिशति। अस्माकं भारते पूर्वम् आर्यजना: सत्यं वदन्ति स्म, अहिंसाम् आचरन्ति स्म। अत एव ते विश्ववन्द्या: आसन्।

सत्यमिदं यत् संसारे य: कोऽपि स्वसंस्कृतिं त्यजति स: कदापि सुखी समृद्धश्च न भवति। अत: यदि वयं सुखं, सम्मानं, समृद्धिं च इच्छा म: तर्हि स्वभारतीयसंस्कृते: सद्गुणा: अस्माभि: ग्रहणीया: पालनीया: एव।

**I एकपदेन उत्तरत ---** ½ x 4 = 2

(क) संस्करणं परिष्करणं च केन भवति?

(ख) भारते पूर्वं के सत्यं वदन्ति स्म?

(ग) मानवाः कया संस्कारं लभन्ते?

(घ) बन्धुत्वभावना केषां संस्कृतेः प्रमुख विशेषता वर्तते?

**II पूर्णवाक्येन उत्तरत ---** 1 x 2 = 2

(क) संस्कृति: जनानां हृदयेभ्य: कानि निस्सार्य दूरीकरोति?

(ख) कः कदापि सुखी समृद्धश्च न भवति?

**III निर्देशानुसारेण उत्तरत---** 1 x 4 = 4

(क) **"पूर्वम् आर्यजना: अहिंसाम् आचरन्ति स्म"** अस्मिन् वाक्ये कर्तृ/कर्ता पदं किम्?

(अ) पूर्वम् (ब) आर्यजना: (स) पापेभ्य: (द) बिभ्यति स्म

(ख) **"इयम् 'आर्यसंस्कृति:' अपि कथ्यते।"** अत्र अव्यय पदं किं प्रयुक्तम्?

(अ) अपि (ब) कथ्यते (स) आर्यसंस्कृति: (द) इयम्

(ग) **"हिंसा"** अनुच्छेदे अस्य पदस्य **विलोमपदं** प्रयुक्तमस्ति।

(अ) सत्यम् (ब) सुखम् (स) अहिंसा (द) सदाचार:

(घ) **"अपाकरोति"** इत्यस्य **पर्याय** पदं प्रयुक्तम्।

(अ) परिष्करोति (ब) दूरीकरोति (स) उपदिशति (द) संस्कृति:

**IV. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।** **2 x 1= 2**

## खण्डः (ख:)

## रचनात्मकं कार्यम्

**प्रश्न- 2. जलसंरक्षणस्य महत्त्वं वर्णयतः मित्रं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा पुनः लिखत-**

**½ x10 = 5**

| |
|---|
| **देशस्य, प्रयतमानाः, विचारयति, जागरूकता, प्रयासः, जानीमः, जीवनम्, सह, अस्तु** |

छात्रावासतः

दिनाङ्कः (i) ____________

प्रिय मित्र!

सप्रेम नमोनमः,

अत्र कुशलं तत्र (ii)____________ । भवतः पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि यत् भवान् मित्रैः (iii)____________ जलसंरक्षणप्रचारकार्ये रतोऽस्ति। एषः तु उत्तमः (iv)___________ अस्ति। वयं सर्वे एव (v)___________ यत् जीवने जलस्य महत्त्वं तु अतुलनीयम्। जलम् एव (vi)____________ इति वयं सर्वे जानीमः परं पुनरपि वयम् अस्य अपव्ययं कुर्मः। अनेन आगामिकाले कियत् भीषणजलसङ्कटः भवेत् इति कोऽपि न (vii)____________। जलसंरक्षणार्थं (viii)____________ अनिवार्या एव। यदि जनाः अत्र

ध्यानं न दास्यन्ति तदा अस्माकं (ix)_____________ स्थितिरपि अफ्रीकादेशवत् भविष्यति। यथा ते जलबिन्दुं प्राप्त्यर्थं (x)____________ सन्ति तथा एव अस्माकं देशस्य अपि स्थितिः भविष्यति। अतः जलसंरक्षणार्थं जागरूकता अनिवार्या। शेषं सर्वं कुशलम्। पितृभ्यां चरणयोः चरणवन्दना।

भवतः मित्रम्।

**प्रश्न 3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाः प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत1x5=5**

**मञ्जूषा**

| |
|---|
| कृषकः, वृषभौ, स्वेदपूर्णम्, परिश्रमकारणात्, अन्नदाता, मेघानां प्रतीक्षाम्, सूर्यातपे, चालयति, कर्षतः, अन्नोत्पादने, हलम्, योगदानम् |



**अथवा**

**मञ्जूषायां प्रदत्त-शब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत – "वृक्षाणां महत्त्वम्"**

**मञ्जूषा**

| |
|---|
| **प्रकृतेः शोभा, पर्यावरणस्य, रक्षकाः, यच्छन्ति, प्राणवायुम्, औषधम्, काष्ठम्, फलानि, मेघवर्षणे, सहायकाः, छायाम्, विहगानाम्, आश्रयस्थलम्,** |

**प्रश्न 4. अधोलिखितानां वाक्यानां संस्कृतभाषायां अनुवादं कुरुत । 1 x 5 = 5**

1. मैं दसवीं कक्षा का छात्र/ की छात्रा हूँ ।
2. मनोहर मेरा मित्र है ।
3. तुम सदैव संस्कृत की ही पुस्तक पढते हो ।
4. हमारा विद्यालय गाँव के नजदीक है ।
5. हीमा दास एक कुशल धाविका है ।

## खण्ड : (ग)

## अनुप्रयुक्तव्याकरणम्

**प्रश्न 5. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धि/सन्धिविच्छेदं कृत्वा लिखत । 1 x 4 = 4**

I. स्वस्थजीवनाय **<u>प्रकृतिः+एव</u>** शरणम् अस्ति ।

II. शृगालगलबद्धः **<u>व्याघ्रोऽपि</u>** सहसा भयात् नष्टः जातः।

III. **<u>अस्मात्+नगरात्</u>** ग्रामः अति दूरमस्ति ।

IV. त्वं किमर्थं **<u>कुम्+ठितः</u>** असि।

V. ग्रीष्मे जनाः **<u>वृक्षच्छायां</u>** सेवन्ते।

**प्रश्न 6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत 1x4 = 4**

क) रामः **<u>शरणागतं</u>** विभीषणम् अरक्षत् ।

(अ) शरणम् आगतम् (ब) शरण आगतम् (स) आगत शरणम्

ख) **<u>महादेवी</u>** करुणां करोतु ।

(अ) महान् देव (ब) महा देवी (स) महती देवी

ग) योगिनं **<u>शीतं च ऊष्णं च</u>** न बाधते ।

(अ) शीतं ऊष्णं च (ब) शीतोष्णम् (स) ऊष्णशीतं च

घ) **<u>क्रूरकर्मः</u>** जनः आतंकवादी भवति ।

(अ) क्रूरं कर्मं यस्य सः ब) क्रूर कर्मः स) क्रूर कर्मी

**प्रश्न 7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत – 1 x 4 = 4**

क) अभिनन्दनः व्यायामं **<u>कर्तुं</u>** व्यायामशालां गच्छति ।

(अ) कृ+क्त्वा (ब) कृ+ त्व (स) कृ+तुमुन्

ख) **<u>शक्ति+मतुप्</u>** जनः सर्वं रक्षति ।

(अ) शक्तिमत् (ब) शक्तिमान् (स) शक्तिमती

ग) विद्यालयतः गृहम् **<u>आगत्य</u>** छात्राः गृहकार्याणि कुर्वन्ति ।

(अ) आ+गम्+क्त्वा (ब) आ+गम्+ल्यप् (स) आ+गम्+य

घ) लोकहितं मम **<u>कृ+अनीयर्</u>** ।

(अ) करणीयः (ब) करणीया (स) करणीयम्

**प्रश्न 8. अधोलिखितवाक्येषु क्रियापदं परिवर्त्य वाच्यपरिवर्तनम् कुरु 1 x 3 = 3**

| **कर्तृवाच्यम्** | **कर्मवाच्यम्** |
|---|---|
| **(क) अहं गृहं गच्छामि ।** | **मया गृहं __________ ।** |

(अ) गच्छति (ब) गच्छेत् (स) गम्यते

| | |
|---|---|
| **(ख) सेवकः सेवां ________ ।** | **सेवकेन सेवा क्रियते ।** |

(अ) कुर्वन्ति (ब) करोति (स) कुरुतः

| | |
|---|---|
| **(ग) माता रोटिकां पचति ।** | **मात्रा रोटिका ________ ।** |

(अ) पचामि (ब) पचन्ति (स) पच्यते

**प्रश्न 9. कोष्ठके प्रदत्त-समयानां कृते कालबोधकशब्दैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत ।1 x 4 = 4**

I. अहं प्रातः काले __________ वादने जागरणं करोमि । (5:30)

II. अहं ________ वादने व्यायामं करोमि। (6:00)

III. अहं ________ वादन् पर्यन्तं नित्यकर्माणि करोमि। (6:45)

IV. अहं गृहात् _________ वादने विद्यालयं प्रति गच्छामि। (7:15)

**प्रश्न 10. अधोलिखितानि वाक्यानि पठित्वा अव्ययपदानि चित्वा लिखत-** **1 x 3 = 3**

(क) वायुमण्डलं भृशं दूषितम्।

(ख) एकदा तस्य भार्या पितुर्गृहं प्रति चलिता।

(ग) तापसौ लवकुशौ ततः प्राविशत्।

**प्रश्न 11. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। अशुद्धं पदं संशोध्य पुनः लिखत** **1 x 3 = 3**

I. सः बालकः **पुस्तकस्य** विना पठति।

(अ) पुस्तकः (ब) पुस्तकाय (स) पुस्तकम्

II. मुस्कान **पुस्तकालयेन** पुस्तकम् आनयति।

(अ) पुस्तकालयात् (ब) पुस्तकालयम् (स) पुस्तकालयस्य

III. अद्य अहं विद्यालयं न **गमिष्यसि**।

(अ) गमिष्यामि (ब) गमिष्यति (स) गमिष्यामः

## खण्ड : (घ)

## पठित-अवबोधनम्

**प्रश्न 12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषभः नोत्थितः।

**I. एकपदेन उत्तरत --** **½ x 2= 1**

(क) कः क्षेत्रकर्षणं कुर्वन्नासीत्?

(ख) तथापि कः न उत्थितः?

**II. पूर्णवाक्येन उत्तरत –** **1 x 2 = 2**

(क) कृषकः काभ्यां क्षेत्रकर्षणं करोति स्म?

(ख) वृषभः कथं क्षेत्रे पपात?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत--** **½ x 4 = 2**

(क) "कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्" अस्मिन् वाक्ये कर्तृपदं किम्?

(अ) क्षेत्रम् (ब) कृषकः (स) बलीवर्दः

(ख) "अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत" अत्र अव्यय पदं किं प्रयुक्तम्?

(अ) तं (ब) दुर्बलं (स) अतः

(ग) गद्यांशे "अपतत्" इत्यस्य पर्याय क्रियापदं किं प्रयुक्तम्?

(अ) पपात (ब) पतति स्म (स) पतिष्यति

(घ) “बलीवर्दयोः” अत्र का विभक्तिः?

(अ) प्रथमा (ब) द्वितीया (स) सप्तमी

**प्रश्न 13. निम्नलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।
वाष्पयानमाला संधावति वितरन्ती ध्वानम्।।
यानानां पंक्तयो ह्यनन्ताः कठिनं संसरणम्।
शुचि पर्यावरणम् ॥

**I. एकपदेन उत्तरत --** ½ x 2 = 1

(क) किं धूमं मुञ्चति?

(ख) कठिनं किम्?

**II. पूर्णवाक्येन उत्तरत –** 1 x 2 = 2

(क) का धावति?

(ख) शतशकटीयानं किं मुञ्चति?

**III. निर्देशानुसारं उत्तराणि लिखत** ½ x 4 = 2

(क) “कज्जलमलिनं धूमं मुञ्चति” अत्र क्रिया पदं किम्?

(अ) कज्जल (ब) धूमं (स) मुञ्चति

(ख) “वितरन्ती” अस्मिन् पदे कः प्रत्ययः?

(अ) क्त (ब) शतृ (स) शानच्

(ग) “हि अनन्ताः” अत्र अव्यय पदं किम्?

(अ) हि (ब) अनन्ताः (स) द्वयोः

(घ) पद्यांशे “मलिनं” अस्य पदस्य विलोम पदं किं प्रयुक्तम्?

(अ) शुद्धं (ब) शुचि (स) अशुद्धं

**प्रश्न 14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्त पश्नानाम् उत्ताराणि संस्कृतेन लिखत ।**

रामः - अहमत्रभवतोः जनकं नामतो वेदितुमिच्छामि।

लवः - न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

रामः - अहो माहात्म्यम्।

कुशः - जानाम्यहं तस्य नामधेयम्।

रामः - कथ्यताम्।

कुशः - निरनुक्रोशो नाम....

रामः - वयस्य, अपूर्वं खलु नामधेयम्।

विदूषकः – (विचिन्त्य) एवं तावत् पृच्छामि निरनुक्रोश इति क एवं भणति?

कुशः – अम्बा ।

**I. एक पदेन उत्तरत --** ½ x 2 = 1

(क) रामः किं वेदितुम् इच्छति?

(ख) "निरनुक्रोशो" इति का भणति?

**II. पूर्णवाक्येन उत्तरत –** **1 x 2 = 2**

(क) कुशः किं जानाति?

(ख) विदूषकः किं पृच्छति?

**III. निर्देशानुसारं प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–** **½ x 4 = 2**

(क) "पितरं" अस्य पदस्य कृते नाट्यांशे किं पदं प्रयुक्तम्?

(अ) पिता (ब) जनकं (स) राजः

(ख) "विचिन्त्य" अत्र कः प्रत्ययः प्रयुक्तः?

(अ) ल्यप् (ब) क्त्वा (स) क्तवतु

(ग) "अपूर्वं खलु नामधेयम्" अस्मिन् वाक्ये अव्यय पदं किम्?

(अ) अपूर्वं (ब) खलु (स) नामधेयम्

(घ) "न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति" अत्र क्रिया पदं किं प्रयुक्तम्?

(अ) तपोवने (ब) नाम (स) व्यवहरति

**प्रश्न 15. रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत--** **1 x 4 = 4**

(क) सिंहः वानराभ्यां **स्वरक्षायां** असमर्थः एवासीत्।

(ख) मयूरस्य नृत्यं **प्रकृतेः** आराधना।

(ग) सर्वे **प्रकृतिमातरं** प्रणमन्ति।

(घ) **पुत्रं** द्रष्टुं सः प्रस्थितः।

**प्रश्न 16. मञ्जूषातः समुचित पदानि चित्वा अधोलिखितश्लोकयोः रिक्त-अन्वयं पूरयत –** **½ x 8 = 4**

| |
|---|
| **अस्तसमये, अपि, एकरूपता, परिपच्यते, विपत्तौ, उदये, व्यायामं, भोजनम्** |

**I. व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम्।**
**विदग्धमविदग्धं वा निर्दोषं परिपच्यते॥**

**अन्वयः –** नित्यम् (i) __________ कुर्वतः विरुद्धम् (ii) __________ विदग्धम् अविदग्धम् वा (iii)__________ निर्दोषम् (iv)__________ ।

**II. संपत्तौ च विपत्तौ च महतामेकरूपता।**
**उदये सविता रक्तो रक्तश्चास्तसमये तथा॥**

**अन्वयः –** महताम् संपत्तौ (v) _________ च (vi)_________ भवति। यथा – सविता (vii) ________ रक्तः भवति, तथा (viii)________ च रक्तः भवति।

**अथवा**

**कोऽपि एकस्य श्लोकस्य संस्कृतेन भावार्थं लिखत।**

**प्रश्न 17. अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण लिखत।** **½ x 8 = 4**

(क) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

(ख) प्रत्युत्पन्नमतिः सा शृगालं आक्षिपन्ती उवाच।

(ग) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।

(घ) मार्गे सा एकं व्याघ्रम् अपश्यत्।

(ङ) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच-अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्।

(च) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।

(छ) 'त्वं व्याघ्रत्रयम् आनेतुं' प्रतिज्ञाय एकमेव आनीतवान्।

(ज) गलबद्धशृगालकः व्याघ्रः पुनः पलायितः।

**प्रश्न 18. मञ्जूषातः पर्यायपदं चित्वा लिखत --** ½ x 6 = 3

| |
|---|
| **शिवः, शिष्टाचारः, शशिः, पुत्रः, अधुना, भानुः** |

(क) हिमकरः

(ख) सम्प्रति

(ग) सदाचारः

(घ) पशुपतिः

(ङ) तनयः

(च) दिवाकरः